बालस्य कवलादेः समयमाह । "कवलः षष्ठमाद्वर्षादष्टमान्तस्य कर्म च । विरेकः षोड़शाद्वर्षाद्विंशतेश्चैव मैथुनम्" । ततः पृथ्वा० इमनिच् वालिमन् बालभावे पु० पक्षे ष्यञ् बाल्य तत्रार्थे न० ।

**बालक** पु० बाल+स्वार्थे क। १शिशौ (वाला) २गन्धद्रव्ये न० राजनि०। ३ह्रीवेरे ४अङ्गुरीयके ५पारिहार्य्ये न०विश्वः। ६अश्वकरिपुच्छयोः ७अज्ञये मेदि० दक्षेणे च पु० विश्वः ।

**बालकप्रिया** स्त्री बालकं प्रीणाति प्री—क । १इन्द्रवारुण्यां (राखलशशा) २कदल्याञ्च राजनि० ३शिशुप्रियमात्रे त्रि०।

**बालक्रमि** पु० ६त० । केशकीटे (उकुन) जटा० ।

**बालक्रीड़नक** पु० बालः क्रीड़त्यनेन क्रीड़—करणे ल्युट् । स्वार्थे क । कपर्दके (कड़ि) राजनि० २तत्क्रीड़ासाधनमात्रे त्रि० ।

**बाल(लि)खिल्य** पु० ब० अङ्गुष्ठपर्वमितेषु षष्टिसहस्रसंख्येषु "क्रतोश्च सन्ततिर्भार्य्या बालखिल्यानसूयत । षष्टियानि सहस्राणि ऋषीणामूर्ध्वरेतसाम्" मार्कपु०उक्तेषु १मुनिभेदेषु । तेषां परिमाणञ्च अङ्गुष्ठमात्रं यथोक्तं भा० स० ३१ अ० । "अथापश्यद्दृषीन् ह्रस्वान् अङ्गुष्ठोदरवर्ष्मणः । पलाशवृन्तिकामेकां सहितान् वहतः पथि । प्रलीनान् स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् । क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके"।"प्राणा वै बालखिल्याः" चरणव्यूहभाष्योक्तेषु २प्राणेषु च । [अमरः ।

**बालगर्भिणी** स्त्री बालैव गर्भिणी । प्रथमगर्भवत्यां गवि

**बालगोपाल** पु० कर्म० । श्रीकृष्णमूर्त्तिभेदे शिशुरूपे गोपाले नारदपञ्चरात्रे दृश्यम् ।

**बालग्रह** पु०६त०। बालानां पीड़के उपग्रहभेदे 'बालग्रहाभिभूतानां बालानां शान्तिकारकमिति" चण्डी । कुमारभृत्याशब्दे २१०८ पृ० दृश्यम् । [२शिशुचर्य्यायां स्त्री

**बालचर्य्य** पु० बालस्येव चर्य्याऽस्य । १कार्त्तिकेये त्रिका० ६त०।

**बालतनय** पु० बालास्तनया इव पत्राण्यस्य ।१खदिरे अमरः २शिशुसुतके पु०स्त्री० ।

**बालतन्त्र** न० बालार्थं तद्रक्षार्थं तन्त्रमुपायः । गर्भिणीचर्य्यायाम् कुमारभृत्यायां त्रिका०२१०८पृ०दृश्यम्

**बालतृण** न० कर्म० । नवतृणे शष्पे अमरः ।

**बालदलक** पु०बाल इव स्वल्पं दलमस्य कप् । खदिरे भरतः

**बालधि** पु० बाला धीयन्तेऽत्र धा—आधारे कि । केशयुक्तलाङ्गूले अमरः ।

**बालपत्र** पु० बाल इव क्षुद्रं पत्रमस्य । १यवासे राजनि० । २खदिरवृक्षे भरतः । ३नवपत्रयुते त्रि० कर्म० । ४नवीने पत्रे न० वा कप् । बालपत्रक खदिरे त्रिका० ।

**बालपाश्या** स्त्री बालस्य केशस्य समीपस्था पाश्या । सीमन्तान्तिकस्थस्वर्णादिरचितपट्टिकारूपे भूषाभेदे (सिँथी) अमरः

**बालपुष्पी** स्त्री० बालानि क्षुद्राणि पुष्पाण्यस्याः ङीप् । यूथिकायाम् राजनि०। कप् बालपुष्पिका तत्रार्थे जटाधरः ।

**बालभद्रक** पु० बालेऽपि भद्र इव कायति कै—क । विषभेदे शब्दच० । [पथ्ये च ।

**बालभैषज्य** न० ६त० । १रसाञ्जने राजनि० २शिशूनामौ-

**बालभोज्य** पु० ६त०।१चणके राजनि० २बालकभक्षणीये त्रि०

**बालमूषिका** स्त्री० कर्म० । क्षुद्रमूषिकायां गिरिकायाम् अमरः ।

**बालयज्ञोपवीतक** न०बालस्य यज्ञोपवीतमिव कायति कै—क । उरस्कटे (वुकवाक्काडि) त्रिका० । [शब्दर० ।

**बालराज** न०बालः स्वल्पोऽपि राजते राज—अच् । वैदूर्य्यमणौ

**बालरोग** पु० भावप्र० उक्ते बालस्य रोगभेदे तन्निदानादि तत्रोक्तं यथा

"अथ बालरोगाणां निदानानि लक्षणानि चाह । "धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा । दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति । मिथ्याहारविहारिण्या दुष्टा वातादयस्त्रयः । दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः । ह्रीवेरं शर्करा क्षौद्रं लीढं तृष्णाहरं परम् ।" इति तृष्णायाम् । "वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः । क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः । खिन्नो भिन्नमलो बालः कामलापित्तरोगवान् । तृष्णालुरुष्णसर्वाङ्गः पित्तदुष्टं पयः पिबन् । श्लेष्मदुष्टं पिबन् क्षीरं लालायुक् श्लेष्मरोगवान् । निद्रार्दितो जड़ः शूनो वक्राक्ष्यक्र्दनः शिशुः । ज्वराद्या व्याधयः सर्वे वक्ष्यन्ते महतान्तु ये । बालानामपि ते तद्वद्बोद्धव्या भिषगुत्तमैः । बालानामेव ये रोगा भवन्ति महतां न च । तालुकण्टकमुख्यांस्तानवधारय यत्नतः ।" तत्रादौ तालुकण्टकमाह । "तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् । तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते । तालुपातात् स्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम् । तृड्भिकण्ठास्यरुजा ग्रीवादुर्द्धरता वमिः ।" पानं स्तनस्य, शकृद्द्रवं द्रवरूपम् । महापद्ममाह । "वीसर्पस्तु शिशोः प्राणनाशनः शीर्षवस्तिजः । पद्मवर्णो महापद्मरोगो२ दोषत्रयोद्भवः । शङ्खाभ्यां